श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे चतुर्विंशोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे चतुर्विंशोऽध्यायः ॥

श्रीशुक उवाच
अधस्तात्सवितुर्योजनायुते स्वर्भानुर्नक्षत्रव -
च्चरतीत्येके योऽसावमरत्वं ग्रहत्वं चालभत।
भगवदनुकम्पया स्वयमसुरापसदः सैंहिकेयो
ह्यतदर्हस्तस्य तात जन्म कर्माणि चोपरिष्टा -
द्वक्ष्यामः ॥ 1 ॥

यददस्तरणेर्मण्डलं प्रतपतस्तद्विस्तरतो
योजनायुतमाचक्षते द्वादशसहस्रं सोमस्य
त्रयोदशसहस्रं राहोर्यः पर्वणि
तद्व्यवधानकृद्वैरानुबन्धः
सूर्याचन्द्रमसावभिधावति ॥ 2 ॥

तन्निशम्योभयत्रापि भगवता रक्षणाय प्रयुक्तं
सुदर्शनं नाम भागवतं दयितमस्त्रं तत्तेजसा
दुर्विषहं मुहुः परिवर्तमानमभ्यवस्थितो
मुहूर्तमुद्विजमानश्चकितहृदय आरादेव निवर्तते
तदुपरागमिति वदन्ति लोकाः ॥ 3 ॥

ततोऽधस्तात्सिद्धचारणविद्याधराणां
सदनानि तावन्मात्र एव ॥ 4 ॥

ततोऽधस्ताद्यक्षरक्षःपिशाचप्रेतभूतगणानां
विहाराजिरमन्तरिक्षं यावद्वायुः प्रवाति यावन्मेघा
उपलभ्यन्ते ॥ 5 ॥

ततोऽधस्ताच्छतयोजनान्तर इयं पृथिवी याव -
द्धंसभासश्येनसुपर्णादयः पतत्त्रिप्रवरा
उत्पतन्तीति ॥ 6 ॥

उपवर्णितं भूमेर्यथा सन्निवेशावस्थानमवनेर -
प्यधस्तात् सप्तभूविवरा एकैकशो योजनायु -
तान्तरेणायामविस्तारेणोपक्लृप्ता अतलं वितलं
सुतलं तलातलं महातलं रसातलं
पातालमिति ॥ 7 ॥

एतेषु हि बिलस्वर्गेषु स्वर्गादप्यधिककाम -
भोगैश्वर्यानन्दभूतिविभूतिभिः
सुसमृद्धभवनोद्यानाक्रीडाविहारेषु
दैत्यदानवकाद्रवेया नित्यप्रमुदिता -
नुरक्तकलत्रापत्यबन्धुसुहृदनुचरा गृहपतय
ईश्वरादप्यप्रतिहतकामा मायाविनोदा निवसन्ति ॥ 8 ॥

येषु महाराज मयेन मायाविना विनिर्मिताः
पुरो नानामणिप्रवरप्रवेकविरचितविचित्रभवन -
प्राकारगोपुरसभाचैत्यचत्वरायतनादिभि -
र्नागासुरमिथुनपारावतशुकसारिकाकीर्णकृत्रिम -

भूमिभिर्विवरेश्वरगृहोत्तमैः समलङ्कृताश्च - 
कासति ॥ 9 ॥

उद्यानानि चातितरां मन इन्द्रियानन्दिभिः 
कुसुमफलस्तबकसुभगकिसलयावनतरुचिर - 
विटपविटपिनां लताङ्गालिङ्गितानां श्रीभिः 
समिथुनविविधविहङ्गमजलाशयानाममल - 
जलपूर्णानां झषकुलोल्लङ्घनक्षुभितनीरनीरज - 
कुमुदकुवलयकह्लारनीलोत्पललोहितशतपत्रादि 
वनेषु कृतनिकेतनानामेकविहाराकुलमधुर - 
विविधस्वनादिभिरिन्द्रियोत्सवैरमरलोकश्रिय - 
मतिशयितानि ॥ 10 ॥

यत्र ह वाव न भयमहोरात्रादिभिः 
कालविभागैरुपलक्ष्यते ॥ 11 ॥

यत्र हि महाहिप्रवरशिरोमणयः सर्वं 
तमः प्रबाधन्ते ॥ 12 ॥

न वा एतेषु वसतां दिव्यौषधिरसरसायनान्नपान - 
स्नानादिभिराधयो व्याधयो वलीपलितजरादयश्च 
देहवैवर्ण्यदौर्गन्ध्यस्वेदक्लमग्लानिरिति 
वयोऽवस्थाश्च भवन्ति ॥ 13 ॥

न हि तेषां कल्याणानां प्रभवति कुतश्चन मृत्युर्विना 
भगवत्तेजसश्चक्रापदेशात् ॥ 14 ॥

यस्मिन् प्रविष्टेऽसुरवधूनां प्रायः पुंसवनानि 
भयादेव स्रवन्ति पतन्ति च ॥ 15 ॥

अथातले मयपुत्रोऽसुरो बलो निवसति येन ह वा
इह सृष्टाः षण्णवतिर्मायाः काश्चनाद्यापि
मायाविनो धारयन्ति यस्य च जृम्भमाणस्य मुखतस्त्रयः
स्त्रीगणा उदपद्यन्त स्वैरिण्यः कामिन्यः पुंश्चल्य
इति या वै बिलायनं प्रविष्टं पुरुषं रसेन
हाटकाख्येन साधयित्वा
स्वविलासावलोकनानुरागस्मितसंलापोपगूहनादिभिः
स्वैरं किल रमयन्ति यस्मिन्नुपयुक्ते पुरुष ईश्वरोऽहं
सिद्धोऽहमित्ययुतमहागजबलमात्मानमभिमन्यमानः
कत्थते मदान्ध इव ॥ **16** ॥

ततोऽधस्ताद्वितले हरो भगवान् हाटकेश्वरः
स्वपार्षदभूतगणावृतः प्रजापतिसर्गोप -
बृंहणाय भवो भवान्या सह मिथुनीभूत
आस्ते यतः प्रवृत्ता सरित्प्रवरा हाटकी नाम
भवयोर्वीर्येण यत्र चित्रभानुर्मातरिश्वना
समिध्यमान ओजसा पिबति तन्निष्ठ्यूतं हाटकाख्यं
सुवर्णं भूषणेनासुरेन्द्रावरोधेषु पुरुषाः
सह पुरुषीभिर्धारयन्ति ॥ **17** ॥

ततोऽधस्तात्सुतले उदारश्रवाः पुण्यश्लोको
विरोचनात्मजो बलिर्भगवता महेन्द्रस्य प्रियं
चिकीर्षमाणेनादितेर्लब्धकायो भूत्वा
वटुवामनरूपेण पराक्षिप्तलोकत्रयो भगवदनु -
कम्पयैव पुनः प्रवेशित इन्द्रादिष्वविद्यमानया
सुसमृद्धया श्रियाभिजुष्टः
स्वधर्मेणाराधयंस्तमेव

भगवन्तमाराधनीयमपगत -
साध्वस आस्तेऽधुनापि ॥ **18** ॥

नो एवैतत्साक्षात्कारो भूमिदानस्य
यत्तद्भगवत्यशेषजीवनिकायानां जीवभूतात्मभूते
परमात्मनि वासुदेवे तीर्थतमे पात्र उपपन्ने परया
श्रद्धया परमादरसमाहितमनसा सम्प्रतिपादितस्य
साक्षादपवर्गद्वारस्य यद्बिलनिलयैश्वर्यम् ॥ **19** ॥

यस्य ह वाव क्षुतपतनप्रस्खलनादिषु विवशः
सकृन्नामाभिगृणन् पुरुषः कर्मबन्धनमञ्जसा
विधुनोति यस्य हैव प्रतिबाधनं मुमुक्षवो -
ऽन्यथैवोपलभन्ते ॥ **20** ॥

तद्भक्तानामात्मवतां सर्वेषामात्मन्यात्मद
आत्मतयैव ॥ **21** ॥

न वै भगवान् नूनममुष्यानुजग्राह यदुत
पुनरात्मानुस्मृतिमोषणं मायामयभोगै -
श्वर्यमेवातनुतेति ॥ **22** ॥

यत्तद्भगवतानधिगतान्योपायेन
याच्ञाच्छलेनापहृत स्वशरीरावशेषितलोकत्रयो
वरुणपाशैश्च सम्प्रतिमुक्तो
गिरिदर्यां चापविद्ध इति होवाच ॥ **23** ॥

नूनं बतायं भगवानर्थेषु न निष्णातो
योऽसाविन्द्रो यस्य सचिवो मन्त्राय वृत
एकान्ततो बृहस्पतिस्तमतिहाय स्वयमु -

पेन्द्रेणात्मानमयाचतात्मनश्चाशिषो नो एव
तद्दास्यमतिगम्भीरवयसः कालस्य
मन्वन्तरपरिवृत्तं कियल्लोकत्रयमिदम् ॥ 24 ॥

यस्यानुदास्यमेवास्मत्पितामहः किल वव्रे न तु
स्वपित्र्यं यदुताकुतोभयं पदं दीयमानं
भगवतः परमिति भगवतोपरते खलु स्वपितरि ॥ 25 ॥

तस्य महानुभावस्यानुपथममृजितकषायः को
वास्मद्विधः परिहीणभगवदनुग्रह
उपजिगमिषतीति ॥ 26 ॥

तस्यानुचरितमुपरिष्टाद्विस्तरिष्यते यस्य
भगवान् स्वयमखिलजगद्गुरुर्नारायणो द्वारि
गदापाणिरवतिष्ठते निजजनानुकम्पितहृदयो
येनाङ्गुष्ठेन पदा दशकन्धरो योजना -
युतायुतं दिग्विजय उच्चाटितः ॥ 27 ॥

ततोऽधस्तात्तलातले मयो नाम दानवेन्द्रस्त्रि -
पुराधिपतिर्भगवता पुरारिणा त्रिलोकीशं
चिकीर्षुणा निर्दग्धस्वपुरत्रयः तत्प्रसादाल्लब्ध -
पदो मायाविनामाचार्यो महादेवेन परिरक्षितो
विगतसुदर्शनभयो महीयते ॥ 28 ॥

ततोऽधस्तान्महातले काद्रवेयाणां सर्पाणां
नैकशिरसां क्रोधवशो नाम गणः कुहकतक्षक -
कालियसुषेणादिप्रधाना महाभोगवन्तः
पतत्त्रिराजाधिपतेः पुरुषवाहादनवरतमुद्विजमानाः

स्वकलत्रापत्यसुहृत्कुटुम्बसङ्गेन क्वचित्प्रमत्ता
विहरन्ति ॥ **29** ॥

ततोऽधस्ताद्रसातले दैतेया दानवाः पणयो नाम
निवातकवचाः कालेया हिरण्यपुरवासिन इति
विबुधप्रत्यनीका उत्पत्त्या महौजसो महासाह -
सिनो भगवतः सकललोकानुभावस्य हरेरेव तेजसा
प्रतिहतबलावलेपा बिलेशया इव वसन्ति ये वै
सरमयेन्द्रदूत्या वाग्भिर्मन्त्रवर्णाभि -
रिन्द्राद्बिभ्यति ॥ **30** ॥

ततोऽधस्तात्पाताले नागलोकपतयो वासुकिप्रमुखाः
शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्ख -
चूडकम्बलाश्वतरदेवदत्तादयो महाभोगिनो
महामर्षा निवसन्ति येषामु ह वै
पञ्चसप्तदशशतसहस्रशीर्षाणां
फणासु विरचिता महामणयो रोचिष्णवः
पातालविवरतिमिरनिकरं स्वरोचिषा विधमन्ति ॥ **31** ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे राह्वादिस्थितिबिलस्वर्गमर्यादानिरूपणं
नाम चतुर्विंशोऽध्यायः ॥